श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्री लक्ष्मीसहस्रनामावलिः ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

The printed source of this nāmāvalī (Śrī Lakṣmī Sahasranāma Stotra & Nāmāvalī, 2nd edition, Śrī Kṛṣṇa Sabhā, Mumbai, December 2012, pp. 36–61) contains numerous typographical errors. A best attempt has been made to correct them.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्री लक्ष्मीसहस्रनामावलिः ॥

1	ओं *श्रियै नमः
2	ओं वासुदेवमहिष्यै नमः
3	ओं पुम्प्रधानेश्वरेश्वर्यै नमः
4	ओं अचिन्त्यानन्तविभवायै नमः
5	ओं भावाभावविभाविन्यै नमः
6	ओं अहम्भावात्मिकायै नमः
7	ओं पद्मायै नमः
8	ओं [1]शान्तानन्तचिदात्मिकायै नमः
9	ओं ब्रह्मभावङ्गतायै नमः
10	ओं त्यक्तभेदायै नमः
11	ओं सर्वजगन्मय्यै नमः
12	ओं षाड्गुण्यपूर्णायै नमः
13	ओं त्रय्यन्तरूपायै नमः

---

* श्रीवासुदेवमहिषी इति स्तोत्रे भवितव्यम्। [1] शान्तानन्तजितात्मिकायै नमः।

14	ओं आत्मानपगामिन्यै नमः
15	ओं [1]एकयोग्यायै नमः
16	ओं अशून्यभावाकृत्यै नमः
17	ओं तेजःप्रभाविन्यै नमः
18	ओं [2]भाव्यभावकभावायै नमः
19	ओं [3]आत्मभाव्यायै नमः
20	ओं [4]कामदुहे नमः
21	ओं आत्मभुवे नमः
22	ओं भावाभावमय्यै नमः
23	ओं दिव्यायै नमः
24	ओं [5]भेद्यभेदकभावन्यै नमः
25	ओं जगत्कुटुम्बिन्यै नमः
26	ओं अखिलाधारायै नमः
27	ओं कामविजृम्भिण्यै नमः
28	ओं पञ्चकृत्यकर्यै नमः
29	ओं पञ्चशक्तिमय्यै नमः
30	ओं आत्मवल्लभायै नमः

[1] एकयोक्तायै नमः। [2] भाव्यभावकभावात्मायै नमः। [3] भाव्यायै नमः। [4] कामयुजे नमः। [5] भेद्यभेदकभावगायै नमः।

31	ओं भावाभावानुगायै नमः
32	ओं सर्वसम्मतायै नमः
33	ओं आत्मोपगूहिन्यै नमः
34	ओं अपृथक्चारिण्यै नमः
35	ओं सौम्यायै नमः
36	ओं [1]सौम्यरूपव्यवस्थितायै नमः
37	ओं आद्यन्तरहितायै नमः
38	ओं देव्यै नमः
39	ओं भवभाव्यस्वरूपिण्यै नमः
40	ओं महाविभूत्यै नमः
41	ओं समताङ्गतायै नमः
42	ओं ज्योतिर्गणेश्वर्यै नमः
43	ओं सर्वकार्यकर्यै नमः
44	ओं धर्मस्वभावात्मने नमः
45	ओं अग्रतः स्थितायै नमः
46	ओं आज्ञासमविभक्ताङ्ग्यै नमः
47	ओं ज्ञानानन्दक्रियामय्यै नमः

[1] सौम्यरूपायै नमः। अव्यवस्थितायै नमः।

48	ओं स्वातन्त्र्यरूपायै नमः
49	ओं देवोरःस्थितायै नमः
50	ओं तद्धर्मधर्मिण्यै नमः
51	ओं सर्वभूतेश्वर्यै नमः
52	ओं सर्वभूतमात्रे नमः
53	ओं आत्ममोहिन्यै नमः
54	ओं सर्वाङ्गसुन्दर्यै नमः
55	ओं सर्वव्यापिन्यै नमः
56	ओं प्राप्तयोगिन्यै नमः
57	ओं विमुक्तिदायिन्यै नमः
58	ओं [1]भक्तिगम्यायै नमः
59	ओं संसारतारिण्यै नमः
60	ओं [2]धर्मार्थसाधिन्यै नमः
61	ओं व्योमनिलयायै नमः
62	ओं व्योमविग्रहायै नमः
63	ओं पञ्चव्योमपद्यै नमः
64	ओं [3]रक्षव्यावृत्त्यै नमः

[1] भक्तगम्यायै नमः। [2] धर्मार्थवादिन्यै नमः। [3] रक्षायै नमः। व्यावृत्त्यै नमः।

65	**ओं प्राप्यपूरिण्यै नमः**
66	**ओं आनन्दरूपायै नमः**
67	**ओं सर्वाप्तिशालिन्यै नमः**
68	**ओं शक्तिनायिकायै नमः**
69	**ओं हिरण्यवर्णायै नमः**
70	**ओं हैरण्यप्राकारायै नमः**
71	**ओं हेममालिन्यै नमः**
72	**ओं [1]प्रत्नरत्नायै नमः**
73	**ओं [2]भद्रपीठायै नमः**
74	**ओं वेशिन्यै नमः**
75	**ओं रजतस्रजायै नमः**
76	**ओं स्वाज्ञाकार्यमरायै नमः**
77	**ओं [3]नित्यायै नमः**
78	**ओं सुरभ्यै नमः**
79	**ओं व्योमचारिण्यै नमः**
80	**ओं योगक्षेमवहायै नमः**
81	**ओं सर्वसुलभायै नमः**

[1] प्रस्फुरत्तायै नमः। [2] भद्रहोमायै नमः। [3] नित्यसुरभ्यै नमः।

82	ओं इच्छाक्रियात्मिकायै नमः
83	ओं [1]करुणाग्रानतमुख्यै नमः
84	ओं [2]कमलाक्ष्यै नमः
85	ओं [3]शशिप्रभायै नमः
86	ओं [4]कल्याणदायिन्यै नमः
87	ओं [5]कल्यायै नमः
88	ओं [6]कलिकल्मषनाशिन्यै नमः
89	ओं प्रज्ञापरिमितायै नमः
90	ओं आत्मानुरूपायै नमः
91	ओं [7]सत्योपयाचितायै नमः
92	ओं मनोज्ञेयायै नमः
93	ओं ज्ञानगम्यायै नमः
94	ओं [8]नित्यमुक्तात्मसेविन्यै नमः
95	ओं कर्तृशक्त्यै नमः
96	ओं सुगहनायै नमः
97	ओं भोक्तृशक्त्यै नमः

[1] महासमूहायै नमः। [2] निखिलप्ररोहायै नमः। [3] वेदगोचरायै नमः।
[4] विस्मयाधायिन्यै नमः। [5] ब्रह्मसंहितायै नमः। [6] सुगणोत्तरायै नमः।
[7] सत्योपयार्जितायै नमः। [8] नित्यमुक्तायै नमः। आत्मसेविन्यै नमः।

98	**ओं गुणप्रियायै नमः**
99	**ओं ज्ञानशक्त्यै नमः**
100	**ओं अनौपम्यायै नमः**
101	**ओं [1]निर्विकल्पायै नमः**
102	**ओं निरामयायै नमः**
103	**ओं अकलङ्कायै नमः**
104	**ओं [2]अमृताधारायै नमः**
105	**ओं महाशक्त्यै नमः**
106	**ओं विकासिन्यै नमः**
107	**ओं महामायायै नमः**
108	**ओं महानन्दायै नमः**
109	**ओं [3]निःसङ्कल्पायै नमः**
110	**ओं निराश्रयायै नमः**
111	**ओं एकस्वरूपायै नमः**
112	**ओं त्रिविधायै नमः**
113	**ओं सङ्ख्यातीतायै नमः**
114	**ओं निरञ्जनायै नमः**

[1] परशक्त्यै नमः। [2] निराधारायै नमः। [3] ब्रह्मनीत्यै नमः।

115	ओं [1]आत्मसत्तायै नमः
116	ओं [2]नित्यशुचये नमः
117	ओं [3]परशक्त्यै नमः
118	ओं सुखोचितायै नमः
119	ओं नित्यशान्तायै नमः
120	ओं निस्तरङ्गायै नमः
121	ओं निर्भिन्नायै नमः
122	ओं सर्वभेदिन्यै नमः
123	ओं असङ्कीर्णायै नमः
124	ओं अविधेयात्मने नमः
125	ओं [4]निषेव्यायै नमः
126	ओं [5]सर्वपालिन्यै नमः
127	ओं निष्कामनायै नमः
128	ओं सर्वरसायै नमः
129	ओं अभेद्यायै नमः
130	ओं सर्वार्थसाधिन्यै नमः
131	ओं अनिर्देश्यायै नमः

[1] आत्मसक्तायै नमः। [2] नित्यशुचये नमः। [3] निर्विकल्पायै नमः। [4] निषेध्यायै नमः।
[5] सर्वपावन्यै नमः।

132	ओं अपरिमितायै नमः
133	ओं निर्विकारायै नमः
134	ओं त्रिलक्षणायै नमः
135	ओं [1]भयङ्कर्यै नमः
136	ओं [2]सिद्धिरूपायै नमः
137	ओं अव्यक्तायै नमः
138	ओं सदसदाकृत्यै नमः
139	ओं अप्रतर्क्यायै नमः
140	ओं अप्रतिहतायै नमः
141	ओं नियन्त्र्यै नमः
142	ओं यन्त्रवाहिन्यै नमः
143	ओं हार्दमूर्त्यै नमः
144	ओं महामूर्त्यै नमः
145	ओं अव्यक्तायै नमः
146	ओं विश्वगोपिन्यै नमः
147	ओं वर्धमानायै नमः
148	ओं अनवद्याङ्ग्यै नमः

[1] अभयङ्कर्यै नमः। [2] स्त्रीस्वरूपायै नमः।

149	ओं निरवद्यायै नमः
150	ओं त्रिवर्गदायै नमः
151	ओं अप्रमेयायै नमः
152	ओं [1]अक्रियायै नमः
153	ओं [2]सूक्ष्मायै नमः
154	ओं [3]परनिर्वाणदायिन्यै नमः
155	ओं अविगीतायै नमः
156	ओं तन्त्रसिद्धायै नमः
157	ओं योगसिद्धायै नमः
158	ओं [4]अमरेश्वर्यै नमः
159	ओं विश्वसूत्यै नमः
160	ओं तर्पयन्त्यै नमः
161	ओं नित्यतृप्तायै नमः
162	ओं महौषध्यै नमः
163	ओं [5]शब्दाह्वयायै नमः
164	ओं शब्दसहायै नमः
165	ओं कृतज्ञायै नमः

[1] अमृतदुधायै नमः। [2] कूटस्थायै नमः। [3] कुलनन्दिन्यै नमः। [4] महेश्वर्यै नमः।
[5] शब्दात्ययायै नमः।

166	ओं कृतलक्षणायै नमः
167	ओं त्रिवर्तिन्यै नमः
168	ओं त्रिलोकस्थायै नमः
169	ओं भूर्भुवःस्वरयोनिजायै नमः
170	ओं अग्राह्यायै नमः
171	ओं [1]अग्राहिकायै नमः
172	ओं अनन्ताह्वयायै नमः
173	ओं सर्वातिशायिन्यै नमः
174	ओं व्योमपद्मायै नमः
175	ओं कृतधुरायै नमः
176	ओं पूर्णकामायै नमः
177	ओं महेश्वर्यै नमः
178	ओं सुवाच्यायै नमः
179	ओं वाचिकायै नमः
180	ओं सत्यकथनायै नमः
181	ओं [2]सर्वपालिन्यै नमः
182	ओं लक्ष्यमाणायै नमः

[1] आग्राह्यकायै नमः। [2] सर्वपाविन्यै नमः।

183	**ओं लक्षयन्त्यै नमः**
184	**ओं जगज्ज्येष्ठायै नमः**
185	**ओं शुभावहायै नमः**
186	**ओं जगत्प्रतिष्ठायै नमः**
187	**ओं भुवनभर्त्र्यै नमः**
188	**ओं [1]गूढाप्रभावत्यै नमः**
189	**ओं क्रियायोगात्मिकायै नमः**
190	**ओं [2]मूर्त्यै नमः**
191	**ओं हृदब्जस्थायै नमः**
192	**ओं महाक्रमायै नमः**
193	**ओं परमदिवे नमः**
194	**ओं प्रथमजायै नमः**
195	**ओं परमाप्तायै नमः**
196	**ओं जगन्निधये नमः**
197	**ओं आत्मानपायिन्यै नमः**
198	**ओं तुल्यस्वरूपायै नमः**
199	**ओं समलक्षणायै नमः**

[1] गूढाप्रभाविन्यै नमः। [2] मूर्तायै नमः।

200	ओं तुल्यवृत्तायै नमः
201	ओं समवयसे नमः
202	ओं मोदमानायै नमः
203	ओं खगध्वजायै नमः
204	ओं [1]प्रियचेष्टायै नमः
205	ओं तुल्यशीलायै नमः
206	ओं वरदायै नमः
207	ओं कामरूपिण्यै नमः
208	ओं समग्रलक्षणायै नमः
209	ओं अनन्तायै नमः
210	ओं तुल्यभूत्यै नमः
211	ओं [2]सनातन्यै नमः
212	ओं महद्ध्यै नमः
213	ओं सत्यसङ्कल्पायै नमः
214	ओं [3]बह्वृचायै नमः
215	ओं परमेश्वर्यै नमः
216	ओं जगन्मात्रे नमः

[1] तुल्यचेष्टायै नमः। [2] सनातनायै नमः। [3] भूमिजायै नमः।

217	ओं सूत्रवत्यै नमः
218	ओं भूतधात्र्यै नमः
219	ओं यशस्विन्यै नमः
220	ओं महाभिलाषायै नमः
221	ओं सावित्र्यै नमः
222	ओं प्रधानायै नमः
223	ओं सर्वभासिन्यै नमः
224	ओं नानावपुषे नमः
225	ओं [1]बहुभिदायै नमः
226	ओं सर्वज्ञायै नमः
227	ओं पुण्यकीर्तनायै नमः
228	ओं भूताश्रयायै नमः
229	ओं [2]हृषीकेश्वर्यै नमः
230	ओं अशोकायै नमः
231	ओं [3]वाजिवाहिकायै नमः
232	ओं ब्रह्मात्मिकायै नमः
233	ओं पुण्यजन्यै नमः

[1] बहुविधायै नमः। [2] हृषीकेशायै नमः। [3] स्वाङ्गिवाहिकायै नमः।

234	ओं सत्यकामायै नमः
235	ओं समाधिभुवे नमः
236	ओं हिरण्यगर्भायै नमः
237	ओं गम्भीरायै नमः
238	ओं गोधूल्यै नमः
239	ओं कमलासनायै नमः
240	ओं जितक्रोधायै नमः
241	ओं कुमुदिन्यै नमः
242	ओं वैजयन्त्यै नमः
243	ओं मनोजवायै नमः
244	ओं धनलक्ष्म्यै नमः
245	ओं स्वस्तिकर्यै नमः
246	ओं राज्यलक्ष्म्यै नमः
247	ओं महासत्यै नमः
248	ओं जयलक्ष्म्यै नमः
249	ओं महागोष्ठ्यै नमः
250	ओं मघोन्यै नमः
251	ओं माधवप्रियायै नमः

252	**ओं पद्मगर्भायै नमः**
253	**ओं वेदवत्यै नमः**
254	**ओं विविक्तायै नमः**
255	**ओं परमेष्ठिन्यै नमः**
256	**ओं सुवर्णबिन्दवे नमः**
257	**ओं महत्यै नमः**
258	**ओं महायोगिप्रियायै नमः**
259	**ओं अनघायै नमः**
260	**ओं पद्मेस्थितायै नमः**
261	**ओं वेदमय्यै नमः**
262	**ओं कुमुदायै नमः**
263	**ओं जयवाहिन्यै नमः**
264	**ओं संहत्यै नमः**
265	**ओं निर्मितायै नमः**
266	**ओं ज्योतिषे नमः**
267	**ओं नियत्यै नमः**
268	**ओं विविधोत्सवायै नमः**
269	**ओं रुद्रवन्द्यायै नमः**

270	ओं सिन्धुमत्यै नमः
271	ओं वेदमात्रे नमः
272	ओं मधुव्रतायै नमः
273	ओं विश्वम्भरायै नमः
274	ओं हैमवत्यै नमः
275	ओं समुद्रायै नमः
276	ओं इच्छाविहारिण्यै नमः
277	ओं अनुकूलायै नमः
278	ओं यज्ञवत्यै नमः
279	ओं शतकोट्यै नमः
280	ओं सुपेशलायै नमः
281	ओं धर्मोदयायै नमः
282	ओं [1]धर्मसेव्यायै नमः
283	ओं सुकुमार्यै नमः
284	ओं सभावत्यै नमः
285	ओं भीमायै नमः
286	ओं ब्रह्मस्तुतायै नमः

[1] धर्मसेवायै नमः।

287	ओं मध्यप्रभायै नमः
288	ओं देवर्षिवन्दितायै नमः
289	ओं देवभोग्यायै नमः
290	ओं महाभागायै नमः
291	ओं प्रतिज्ञायै नमः
292	ओं पूर्णशेवध्यै नमः
293	ओं [1]सुवर्णरुचिरप्रख्यायै नमः
294	ओं भोगिन्यै नमः
295	ओं भोगदायिन्यै नमः
296	ओं [2]वसुप्रदायै नमः
297	ओं उत्तमवध्वे नमः
298	ओं गायत्र्यै नमः
299	ओं कमलोद्भवायै नमः
300	ओं विद्वत्प्रियायै नमः
301	ओं पद्मचिह्नायै नमः
302	ओं वरिष्ठायै नमः
303	ओं कमलेक्षणायै नमः

[1] सुवर्णायै नमः। रुचिरप्रख्यायै नमः। [2] वसुप्रणायै नमः।

304	**ओं पद्मप्रियायै नमः**
305	**ओं सुप्रसन्नायै नमः**
306	**ओं प्रमोदायै नमः**
307	**ओं प्रियपार्श्वगायै नमः**
308	**ओं विश्वभूषायै नमः**
309	**ओं कान्तिमत्यै नमः**
310	**ओं कृष्णायै नमः**
311	**ओं वीणारवोत्सुकायै नमः**
312	**ओं रोचिष्कर्यै नमः**
313	**ओं स्वप्रकाशायै नमः**
314	**ओं [1]शोभमानविहङ्गमायै नमः**
315	**ओं [2]देवाङ्कस्थायै नमः**
316	**ओं परिणत्यै नमः**
317	**ओं कामवत्सायै नमः**
318	**ओं महामत्यै नमः**
319	**ओं इल्वलायै नमः**
320	**ओं उत्पलनाभायै नमः**

[1] शोभमानायै नमः। विहङ्गमायै नमः। [2] देवमानायै नमः।

321	ओं आधिशमन्यै नमः
322	ओं वरवर्णिन्यै नमः
323	ओं स्वनिष्ठायै नमः
324	ओं पद्मनिलयायै नमः
325	ओं सद्गत्यै नमः
326	ओं पद्मगन्धिन्यै नमः
327	ओं पद्मवर्णायै नमः
328	ओं कामयोन्यै नमः
329	ओं चण्डिकायै नमः
330	ओं चारुकोपनायै नमः
331	ओं रतिस्नुषायै नमः
332	ओं पद्मधरायै नमः
333	ओं पूज्यायै नमः
334	ओं त्रैलोक्यमोहिन्यै नमः
335	ओं नित्यकन्यायै नमः
336	ओं बिन्दुमालिन्यै नमः
337	ओं अक्षयायै नमः

338	ओं [1]सर्वमातृकायै नमः
339	ओं गन्धात्मिकायै नमः
340	ओं सुरसिकायै नमः
341	ओं दीप्तमूर्त्यै नमः
342	ओं सुमध्यमायै नमः
343	ओं पृथुश्रोण्यै नमः
344	ओं सौम्यमुख्यै नमः
345	ओं सुभगायै नमः
346	ओं विष्टरश्रुत्यै नमः
347	ओं स्मिताननायै नमः
348	ओं [2]चारुदत्यै नमः
349	ओं निम्ननाभ्यै नमः
350	ओं महास्तन्यै नमः
351	ओं स्निग्धवेण्यै नमः
352	ओं भगवत्यै नमः
353	ओं सुकान्तायै नमः
354	ओं वामलोचनायै नमः

[1] सर्वगन्धिन्यै नमः। [2] चारुगत्यै नमः।

355	**ओं पल्लवाङ्घ्र्यै नमः**
356	**ओं पद्ममनसे नमः**
357	**ओं पद्मबोधायै नमः**
358	**ओं महाप्सरसे नमः**
359	**ओं [1]विद्वत्प्रियायै नमः**
360	**ओं चारुहासायै नमः**
361	**ओं शुभदृष्ट्यै नमः**
362	**ओं ककुद्मिन्यै नमः**
363	**ओं कम्बुग्रीवायै नमः**
364	**ओं सुजघनायै नमः**
365	**ओं रक्तपाण्यै नमः**
366	**ओं मनोरमायै नमः**
367	**ओं पद्मिन्यै नमः**
368	**ओं मन्दगमनायै नमः**
369	**ओं चतुर्दंष्ट्रायै नमः**
370	**ओं चतुर्भुजायै नमः**
371	**ओं शुभरेखायै नमः**

[1] सरस्वत्यै नमः।

372	ओं विलासभ्रुवे नमः
373	ओं शुकवाण्यै नमः
374	ओं कलावत्यै नमः
375	ओं ऋजुनासायै नमः
376	ओं कलरवायै नमः
377	ओं वरारोहायै नमः
378	ओं तलोदर्यै नमः
379	ओं सन्ध्यायै नमः
380	ओं बिम्बाधरायै नमः
381	ओं पूर्वभाषिण्यै नमः
382	ओं [1]स्त्रीसमाह्वयायै नमः
383	ओं इक्षुचापायै नमः
384	ओं सुमशरायै नमः
385	ओं दिव्यभूषायै नमः
386	ओं मनोहरायै नमः
387	ओं वासव्यै नमः
388	ओं पाण्डरच्छत्रायै नमः

[1] श्रीसमाह्वयायै नमः।

389	**ओं करभोरवे नमः**
390	**ओं तिलोत्तमायै नमः**
391	**ओं सीमन्तिन्यै नमः**
392	**ओं प्राणशक्त्यै नमः**
393	**ओं विभीषिण्यै नमः**
394	**ओं असुधारिण्यै नमः**
395	**ओं [1]भद्रायै नमः**
396	**ओं जयावहायै नमः**
397	**ओं चन्द्रवदनायै नमः**
398	**ओं कुटिलालकायै नमः**
399	**ओं चित्राम्बरायै नमः**
400	**ओं चित्रगन्धायै नमः**
401	**ओं रत्नमौलिसमुज्ज्वलायै नमः**
402	**ओं दिव्यायुधायै नमः**
403	**ओं दिव्यमाल्यायै नमः**
404	**ओं [2]विशाखायै नमः**
405	**ओं चित्रवाहनायै नमः**

[1] मुद्रायै नमः। [2] विशालायै नमः।

406	**ओं अम्बिकायै नमः**
407	**ओं सिन्धुतनयायै नमः**
408	**ओं [1]सुश्रोण्यै नमः**
409	**ओं [2]सुमहासनायै नमः**
410	**ओं सामप्रियायै नमः**
411	**ओं [3]नम्रिताङ्ग्यै नमः**
412	**ओं सर्वसेव्यायै नमः**
413	**ओं वराङ्गनायै नमः**
414	**ओं गन्धद्वारायै नमः**
415	**ओं दुराधर्षायै नमः**
416	**ओं नित्यपुष्टायै नमः**
417	**ओं करीषिण्यै नमः**
418	**ओं देवजुष्टायै नमः**
419	**ओं [4]आदित्यवर्णायै नमः**
420	**ओं दिव्यगन्धायै नमः**
421	**ओं [5]सुहृत्तमायै नमः**
422	**ओं अनन्तरूपायै नमः**

[1] निश्रेण्यै नमः। [2] सुमहासिन्यै नमः। [3] नवमृग्यै नमः। [4] दिव्यवर्णायै नमः।
[5] स्वकर्दमायै नमः।

423	ओं अनन्तस्थायै नमः
424	ओं सर्वदानन्तसङ्गमायै नमः
425	ओं [1]यज्ञाशिन्यै नमः
426	ओं महावृष्ट्यै नमः
427	ओं सर्वपूज्यायै नमः
428	ओं वषट्क्रियायै नमः
429	ओं योगप्रियायै नमः
430	ओं वियन्नाभ्यै नमः
431	ओं अनन्तश्रियै नमः
432	ओं अतीन्द्रियायै नमः
433	ओं योगिसेव्यायै नमः
434	ओं सत्यरतायै नमः
435	ओं योगमायायै नमः
436	ओं पुरातन्यै नमः
437	ओं सर्वेश्वर्यै नमः
438	ओं [2]सुतरण्यै नमः
439	ओं शरण्यायै नमः

[1] यज्ञाशन्यै नमः। [2] सुतरुण्यै नमः।

440	**ओं धर्मदेवतायै नमः**
441	**ओं सुतरायै नमः**
442	**ओं [1]संवृतज्योतिषे नमः**
443	**ओं योगिन्यै नमः**
444	**ओं योगसिद्धिदायै नमः**
445	**ओं सृष्टिशक्त्यै नमः**
446	**ओं [2]द्योतमानायै नमः**
447	**ओं भूतायै नमः**
448	**ओं मङ्गलदेवतायै नमः**
449	**ओं संहारशक्त्यै नमः**
450	**ओं प्रबलायै नमः**
451	**ओं निरुपाधये नमः**
452	**ओं परावरायै नमः**
453	**ओं उत्तारिण्यै नमः**
454	**ओं तारयन्त्यै नमः**
455	**ओं शाश्वत्यै नमः**
456	**ओं समितिञ्जयायै नमः**

[1] संहृतज्योतिषे नमः। [2] द्योतमानभूतायै नमः।

457	**ओं महाश्रियै नमः**
458	**ओं अजहत्कीर्त्यै नमः**
459	**ओं योगश्रियै नमः**
460	**ओं [1]सिद्धिसाधिन्यै नमः**
461	**ओं पुण्यश्रियै नमः**
462	**ओं पुण्यनिलयायै नमः**
463	**ओं ब्रह्मश्रियै नमः**
464	**ओं ब्राह्मणप्रियायै नमः**
465	**ओं [2]राजश्रियै नमः**
466	**ओं राजकलितायै नमः**
467	**ओं फलश्रियै नमः**
468	**ओं स्वर्गदायिन्यै नमः**
469	**ओं देवश्रियै नमः**
470	**ओं अद्भुतकथायै नमः**
471	**ओं वेदश्रियै नमः**
472	**ओं श्रुतिमार्गिण्यै नमः**
473	**ओं तमोपहायै नमः**

[1] सिद्धिसाधन्यै नमः। [2] राज्यश्रियै नमः।

474	ओं अव्ययनिधये नमः
475	ओं [1]लक्षणायै नमः
476	ओं हृदयङ्गमायै नमः
477	ओं [2]मृतसञ्जीविन्यै नमः
478	ओं शुभ्रायै नमः
479	ओं चन्द्रिकायै नमः
480	ओं सर्वतोमुख्यै नमः
481	ओं सर्वोत्तमायै नमः
482	ओं मित्रविन्दायै नमः
483	ओं मैथिल्यै नमः
484	ओं प्रियदर्शनायै नमः
485	ओं सत्यभामायै नमः
486	ओं वेदवेद्यायै नमः
487	ओं सीतायै नमः
488	ओं प्रणतपोषिण्यै नमः
489	ओं मूलप्रकृत्यै नमः
490	ओं [3]ईशानायै नमः

[1] लक्ष्मणायै नमः। [2] मृतसञ्जीवन्यै नमः। [3] ईशान्यै नमः।

491	**ओं शिवदायै नमः**
492	**ओं दीप्रदीपिन्यै नमः**
493	**ओं [1]अभिप्रियायै नमः**
494	**ओं स्वैरवृत्त्यै नमः**
495	**ओं रुक्मिण्यै नमः**
496	**ओं सर्वसाक्षिण्यै नमः**
497	**ओं गान्धारिण्यै नमः**
498	**ओं परगत्यै नमः**
499	**ओं तत्त्वगर्भायै नमः**
500	**ओं भवाभवायै नमः**
501	**ओं [2]अन्तर्वृत्त्यै नमः**
502	**ओं [3]महारुद्रायै नमः**
503	**ओं विष्णुदुर्गायै नमः**
504	**ओं महाबलायै नमः**
505	**ओं मदयन्त्यै नमः**
506	**ओं लोकधारिण्यै नमः**
507	**ओं अदृश्यायै नमः**

[1] अभिप्रायायै नमः। [2] अन्तर्वर्त्यै नमः। [3] महामुद्रायै नमः।

508	**ओं सर्वनिष्कृत्यै नमः**
509	**ओं देवसेनायै नमः**
510	**ओं [1]आत्मबलदायै नमः**
511	**ओं वसुधायै नमः**
512	**ओं मुख्यमातृकायै नमः**
513	**ओं क्षीरधारायै नमः**
514	**ओं घृतमय्यै नमः**
515	**ओं जुह्वत्यै नमः**
516	**ओं यज्ञदक्षिणायै नमः**
517	**ओं योगनिद्रायै नमः**
518	**ओं योगरतायै नमः**
519	**ओं ब्रह्मचर्यायै नमः**
520	**ओं दुरत्ययायै नमः**
521	**ओं सिंहपिञ्छायै नमः**
522	**ओं महादुर्गायै नमः**
523	**ओं जयन्त्यै नमः**
524	**ओं [2]खड्गधारिण्यै नमः**

[1] आत्मफलदायै नमः। [2] खगवाहिण्यै नमः।

525	ओं [1]सर्वार्तिनाशिन्यै नमः
526	ओं हृष्टायै नमः
527	ओं सर्वेच्छापरिपूरिकायै नमः
528	ओं आर्यायै नमः
529	ओं यशोदायै नमः
530	ओं वसुदायै नमः
531	ओं धर्मकामार्थमोक्षदायै नमः
532	ओं त्रिशूलिन्यै नमः
533	ओं [2]पद्मचिह्नायै नमः
534	ओं महाकाल्यै नमः
535	ओं [3]इन्दुमालिन्यै नमः
536	ओं एकवीरायै नमः
537	ओं भद्रकाल्यै नमः
538	ओं [4]स्वानन्दिन्यै नमः
539	ओं उल्लसद्गदायै नमः
540	ओं नारायण्यै नमः

[1] जगप्रियायै नमः। विरूपाक्ष्यै नमः। सुवर्णायै नमः। क्रूरतापिन्यै नमः। कात्यायन्यै नमः। कालरात्र्यै नमः। निशिदृष्टायै नमः। करालिकायै नमः। [2] खड्गधरायै नमः। [3] इन्द्रमालिन्यै नमः। [4] सौनन्द्यै नमः।

541	ओं [1]जगत्पूरण्यै नमः
542	ओं उर्वरायै नमः
543	ओं द्रुहिणप्रसवे नमः
544	ओं यज्ञकामायै नमः
545	ओं लेलिहानायै नमः
546	ओं तीर्थकर्यै नमः
547	ओं उग्रविक्रमायै नमः
548	ओं गरुत्मदुदयायै नमः
549	ओं अत्युग्रायै नमः
550	ओं वाराह्यै नमः
551	ओं [2]मातृभाषिण्यै नमः
552	ओं अश्वक्रान्तायै नमः
553	ओं रथक्रान्तायै नमः
554	ओं विष्णुक्रान्तायै नमः
555	ओं उरुचारिण्यै नमः
556	ओं [3]वैरोचन्यै नमः
557	ओं नारसिंह्यै नमः

[1] जगत्पूरिण्यै नमः। [2] मातृभीषिण्यै नमः। [3] वैरोचिन्यै नमः।

558	ओं जीमूतायै नमः
559	ओं शुभदेक्षणायै नमः
560	ओं [1]दीक्षाविदायै नमः
561	ओं विश्वशक्त्यै नमः
562	ओं [2]बीजशक्त्यै नमः
563	ओं [3]सुदर्शन्यै नमः
564	ओं [4]प्रतीतायै नमः
565	ओं जगत्यै नमः
566	ओं वन्यधारिण्यै नमः
567	ओं कलिनाशिन्यै नमः
568	ओं अयोध्यायै नमः
569	ओं अच्छिन्नसन्तानायै नमः
570	ओं महारत्नायै नमः
571	ओं सुखावहायै नमः
572	ओं राजवत्यै नमः
573	ओं [5]अप्रतिभयायै नमः
574	ओं [6]विनयन्त्यै नमः

[1] दीक्षाविधायै नमः। [2] निजशक्त्यै नमः। [3] सुदर्शिन्यै नमः। [4] प्रतीत्यै नमः।
[5] अर्कप्रतिभायै नमः। [6] विनयित्र्यै नमः।

575	ओं महाशनायै नमः
576	ओं अमृतस्यन्दिन्यै नमः
577	ओं सीमायै नमः
578	ओं यज्ञगर्भायै नमः
579	ओं [1]समेक्षणायै नमः
580	ओं आकूत्यै नमः
581	ओं ऋग्यजुःसामघोषायै नमः
582	ओं [2]आरामवनोत्सुकायै नमः
583	ओं सोमपायै नमः
584	ओं माधव्यै नमः
585	ओं नित्यकल्याण्यै नमः
586	ओं कमलार्चितायै नमः
587	ओं [3]योगरूढायै नमः
588	ओं स्वार्थजुष्टायै नमः
589	ओं वह्निवर्णायै नमः
590	ओं जितासुरायै नमः
591	ओं यज्ञविद्यायै नमः

[1] समीक्षणायै नमः। [2] अरामवधूत्सुकायै नमः। [3] योगरूढ्यै नमः।

592	**ओं गुह्यविद्यायै नमः**
593	**ओं अध्यात्मविद्यायै नमः**
594	**ओं कृतागमायै नमः**
595	**ओं [1]आप्यायन्यै नमः**
596	**ओं कलातीतायै नमः**
597	**ओं सुमित्रायै नमः**
598	**ओं परभक्तिदायै नमः**
599	**ओं काङ्क्षमाणायै नमः**
600	**ओं महामायायै नमः**
601	**ओं कोलकामायै नमः**
602	**ओं अमरावत्यै नमः**
603	**ओं सुवीर्यायै नमः**
604	**ओं दुःस्वप्नहरायै नमः**
605	**ओं देवक्यै नमः**
606	**ओं वसुदेवतायै नमः**
607	**ओं सौदामिन्यै नमः**
608	**ओं मेघरथायै नमः**

[1] आप्यायिन्यै नमः।

609	ओं [1]दैत्यदानवमर्दिन्यै नमः
610	ओं श्रेयस्कर्यै नमः
611	ओं चित्रलीलायै नमः
612	ओं [2]एकाकिन्यै नमः
613	ओं रत्नपादुकायै नमः
614	ओं मनस्यमानायै नमः
615	ओं तुलस्यै नमः
616	ओं रोगनाशिन्यै नमः
617	ओं [3]उरुप्रदायै नमः
618	ओं तेजस्विन्यै नमः
619	ओं [4]सुखज्वालायै नमः
620	ओं मन्दरेखायै नमः
621	ओं अमृताशिन्यै नमः
622	ओं ब्रह्मिष्ठायै नमः
623	ओं [5]वह्निशमनायै नमः
624	ओं [6]जोषमाणायै नमः

[1] ऋद्धिदायै नमः। दैत्यमर्दिन्यै नमः। [2] एकायिन्यै नमः। [3] उरुप्रथायै नमः।
[4] सुखोज्ज्वालायै नमः। [5] वह्निशमन्यै नमः। [6] जुषमाणायै नमः।

625	ओं गुणात्ययायै नमः
626	ओं कादम्बर्यै नमः
627	ओं ब्रह्मरतायै नमः
628	ओं विधात्र्यै नमः
629	ओं उज्ज्वलहस्तिकायै नमः
630	ओं अक्षोभ्यायै नमः
631	ओं सर्वतोभद्रायै नमः
632	ओं वयस्यायै नमः
633	ओं स्वस्तिदक्षिणायै नमः
634	ओं सहस्रास्यायै नमः
635	ओं ज्ञानमात्रे नमः
636	ओं वैश्वानर्यै नमः
637	ओं अक्षवर्तिन्यै नमः
638	ओं प्रत्यग्वरायै नमः
639	ओं वारणवत्यै नमः
640	ओं अनसूयायै नमः
641	ओं दुरासदायै नमः
642	ओं अरुन्धत्यै नमः

643	ओं कुण्डलिन्यै नमः
644	ओं भव्यायै नमः
645	ओं दुर्गतिनाशिन्यै नमः
646	ओं मृत्युञ्जयायै नमः
647	ओं [1]त्रासहर्यै नमः
648	ओं निर्भयायै नमः
649	ओं शत्रुसूदिन्यै नमः
650	ओं एकाक्षरायै नमः
651	ओं [2]सत्पुरन्ध्र्यै नमः
652	ओं सुरपक्षायै नमः
653	ओं [3]सुरातुलायै नमः
654	ओं [4]सकृद्विभातायै नमः
655	ओं [5]सर्वार्तिसमुद्रपरिशोषिण्यै नमः
656	ओं बिल्वप्रियायै नमः
657	ओं अवन्यै नमः
658	ओं चक्रहृदयायै नमः
659	ओं कम्बुतीर्थगायै नमः

[1] त्रासहरायै नमः। [2] सुपुरन्ध्र्यै नमः। [3] वरातुलायै नमः। [4] सकृद्विभासायै नमः।
[5] प्रद्युम्नायै नमः। हरिभद्रायै नमः। धुरन्धरायै नमः।

660	ओं सर्वमन्त्रात्मिकायै नमः
661	ओं विद्युते नमः
662	ओं [1]सुवर्णायै नमः
663	ओं सर्वरङ्गिन्यै नमः
664	ओं ध्वजच्छत्राश्रयायै नमः
665	ओं [2]भूत्यै नमः
666	ओं वैष्णव्यै नमः
667	ओं सद्गुणोज्ज्वलायै नमः
668	ओं सुषेणायै नमः
669	ओं लोकविदितायै नमः
670	ओं कामसुवे नमः
671	ओं जगदादिभुवे नमः
672	ओं वेदान्तयोन्यै नमः
673	ओं जिज्ञासायै नमः
674	ओं मनीषायै नमः
675	ओं समदर्शिन्यै नमः
676	ओं सहस्रशक्त्यै नमः

[1] यशोदायै नमः। [2] भूम्यै नमः।

677	ओं आवृत्त्यै नमः
678	ओं सुस्थिरायै नमः
679	ओं श्रेयसां निधये नमः
680	ओं रोहिण्यै नमः
681	ओं रेवत्यै नमः
682	ओं चन्द्रसोदर्यै नमः
683	ओं [1]भद्रमोहिन्यै नमः
684	ओं [2]सूर्यायै नमः
685	ओं [3]कन्याप्रियायै नमः
686	ओं विश्वभाविन्यै नमः
687	ओं सुविभाविन्यै नमः
688	ओं सुप्रदृश्यायै नमः
689	ओं कामचारिण्यै नमः
690	ओं अप्रमत्तायै नमः
691	ओं ललन्तिकायै नमः
692	ओं मोक्षलक्ष्म्यै नमः
693	ओं [4]जगद्योन्यै नमः

[1] भद्रमोदिन्यै नमः। [2] आर्यायै नमः। [3] गव्यप्रियायै नमः। [4] जगज्ज्योतिषे नमः।

694	**ओं व्योमलक्ष्म्यै नमः**
695	**ओं सुदुर्लभायै नमः**
696	**ओं भास्कर्यै नमः**
697	**ओं पुण्यगेहस्थायै नमः**
698	**ओं मनोज्ञायै नमः**
699	**ओं विभवप्रदायै नमः**
700	**ओं लोकस्वामिन्यै नमः**
701	**ओं अच्युतार्थायै नमः**
702	**ओं पुष्कलायै नमः**
703	**ओं जगदाकृत्यै नमः**
704	**ओं विचित्रहारिण्यै नमः**
705	**ओं कान्तायै नमः**
706	**ओं [1]वाहिन्यै नमः**
707	**ओं [2]भूतवासिन्यै नमः**
708	**ओं प्राणिन्यै नमः**
709	**ओं प्राणदायै नमः**
710	**ओं [3]विश्वायै नमः**

[1] पाविन्यै नमः। [2] भूतभाविन्यै नमः। [3] विद्धते नमः।

711	ओं विश्वब्रह्माण्डवासिन्यै नमः
712	ओं सम्पूर्णायै नमः
713	ओं परमोत्साहायै नमः
714	ओं श्रीमत्यै नमः
715	ओं श्रीपत्यै नमः
716	ओं श्रुत्यै नमः
717	ओं श्रयन्त्यै नमः
718	ओं [1]श्रीयमाणायै नमः
719	ओं क्ष्मायै नमः
720	ओं विश्वरूपायै नमः
721	ओं प्रसादिन्यै नमः
722	ओं [2]हर्षिण्यै नमः
723	ओं प्रथमायै नमः
724	ओं [3]शर्वायै नमः
725	ओं विशालायै नमः
726	ओं कामवर्षिण्यै नमः
727	ओं सुप्रतीकायै नमः

[1] श्रयमाणायै नमः। [2] हर्षण्यै नमः। [3] सर्वायै नमः।

728	ओं पृश्निमत्यै नमः
729	ओं निवृत्त्यै नमः
730	ओं विविधायै नमः
731	ओं परायै नमः
732	ओं सुयज्ञायै नमः
733	ओं मधुरायै नमः
734	ओं श्रीदायै नमः
735	ओं देवरात्यै नमः
736	ओं महामनसे नमः
737	ओं स्थूलायै नमः
738	ओं सर्वाकृत्यै नमः
739	ओं [1]स्थेमायै नमः
740	ओं [2]निम्नगर्भायै नमः
741	ओं तमोनुदायै नमः
742	ओं तुष्ट्यै नमः
743	ओं वागीश्वर्यै नमः
744	ओं पुष्ट्यै नमः

[1] सूक्ष्मायै नमः। [2] निम्नगव्यायै नमः।

745	ओं [1]सर्वाद्यै नमः
746	ओं [2]सर्वशोषिण्यै नमः
747	ओं शक्त्यात्मिकायै नमः
748	ओं शब्दशक्त्यै नमः
749	ओं विशिष्टायै नमः
750	ओं वायुमत्यै नमः
751	ओं [3]उमायै नमः
752	ओं आन्वीक्षिक्यै नमः
753	ओं [4]त्रय्यै नमः
754	ओं वार्तायै नमः
755	ओं दण्डनीत्यै नमः
756	ओं [5]नयात्मिकायै नमः
757	ओं व्याल्यै नमः
758	ओं [6]सङ्कर्षिण्यै नमः
759	ओं द्योतायै नमः
760	ओं महादेव्यै नमः
761	ओं अपराजितायै नमः

[1] सर्वायै नमः। आद्यायै नमः। [2] स्वरुशोषिण्यै नमः। [3] अमायै नमः। [4] त्रयीवार्तायै नमः। [5] नियामिकायै नमः। [6] सङ्कर्षण्यै नमः।

762	ओं कपिलायै नमः
763	ओं पिङ्गलायै नमः
764	ओं स्वस्थायै नमः
765	ओं बलाक्यै नमः
766	ओं घोषनन्दिन्यै नमः
767	ओं अजितायै नमः
768	ओं [1]कर्षिण्यै नमः
769	ओं [2]नीत्यै नमः
770	ओं गरुडायै नमः
771	ओं गरुडासनायै नमः
772	ओं ह्लादिन्यै नमः
773	ओं अनुग्रहायै नमः
774	ओं नित्यायै नमः
775	ओं ब्रह्मविद्यायै नमः
776	ओं हिरण्मय्यै नमः
777	ओं मह्यै नमः
778	ओं [3]शुद्धविधायै नमः

[1] कर्षण्यै नमः। [2] क्षान्त्यै नमः। [3] सुद्धविदायै नमः।

779	ओं पृथ्व्यै नमः
780	ओं [1]सन्तानिन्यै नमः
781	ओं अंशुमालिन्यै नमः
782	ओं यज्ञाश्रयायै नमः
783	ओं ख्यातिपरायै नमः
784	ओं स्तव्यायै नमः
785	ओं [2]वृष्ट्यै नमः
786	ओं त्रिकालगायै नमः
787	ओं सम्बोधिन्यै नमः
788	ओं शब्दपूर्णायै नमः
789	ओं विजयायै नमः
790	ओं अंशुमत्यै नमः
791	ओं कलायै नमः
792	ओं शिवायै नमः
793	ओं स्तुतिप्रियायै नमः
794	ओं ख्यात्यै नमः
795	ओं जीवयन्त्यै नमः

[1] शतानन्दायै नमः। [2] धृष्ट्यै नमः।

796	**ओं पुनर्वसवे नमः**
797	**ओं दीक्षायै नमः**
798	**ओं भक्तार्तिहायै नमः**
799	**ओं रक्षायै नमः**
800	**ओं परीक्षायै नमः**
801	**ओं यज्ञसम्भवायै नमः**
802	**ओं आर्द्रायै नमः**
803	**ओं पुष्करिण्यै नमः**
804	**ओं [1]पुण्यायै नमः**
805	**ओं गण्यायै नमः**
806	**ओं दारिद्र्यभञ्जिन्यै नमः**
807	**ओं धन्यायै नमः**
808	**ओं मान्यायै नमः**
809	**ओं पद्मनेम्यै नमः**
810	**ओं भार्गव्यै नमः**
811	**ओं [2]वंशवर्धन्यै नमः**
812	**ओं तीक्ष्णाप्रवृत्त्यै नमः**

[1] पुण्यगण्यायै नमः। [2] वंशवर्धिन्यै नमः।

813	ओं सत्कीर्त्यै नमः
814	ओं [1]निषेव्यायै नमः
815	ओं [2]अघविनाशिन्यै नमः
816	ओं संज्ञायै नमः
817	ओं निःसंशायायै नमः
818	ओं पूर्वायै नमः
819	ओं वनमालायै नमः
820	ओं वसुन्धरायै नमः
821	ओं [3]पृथवे नमः
822	ओं महोत्कटायै नमः
823	ओं अहल्यायै नमः
824	ओं मण्डलायै नमः
825	ओं आश्रितमानदायै नमः
826	ओं सर्वायै नमः
827	ओं नित्योदितायै नमः
828	ओं उदारायै नमः
829	ओं जृम्भमाणायै नमः

[1] निधिसेव्यायै नमः। [2] अघनाशिन्यै नमः। [3] पृथ्व्यै नमः।

830	**ओं महोदयायै नमः**
831	**ओं चन्द्रकान्तोदितायै नमः**
832	**ओं [1]चन्द्रायै नमः**
833	**ओं चतुरश्रायै नमः**
834	**ओं मनोजवायै नमः**
835	**ओं बालायै नमः**
836	**ओं कुमार्यै नमः**
837	**ओं युवत्यै नमः**
838	**ओं करुणायै नमः**
839	**ओं भक्तवत्सलायै नमः**
840	**ओं मेदिन्यै नमः**
841	**ओं उपनिषन्मिश्रायै नमः**
842	**ओं सुमवीरवे नमः**
843	**ओं धनेश्वर्यै नमः**
844	**ओं दुर्मर्षण्यै नमः**
845	**ओं सुचरितायै नमः**
846	**ओं बोधायै नमः**

[1] सूर्यायै नमः।

847	**ओं शोभायै नमः**
848	**ओं सुवर्चलायै नमः**
849	**ओं यमुनायै नमः**
850	**ओं अक्षौहिण्यै नमः**
851	**ओं गङ्गायै नमः**
852	**ओं मन्दाकिन्यै नमः**
853	**ओं [1]अमरालयायै नमः**
854	**ओं गोदायै नमः**
855	**ओं गोदावर्यै नमः**
856	**ओं चन्द्रभागायै नमः**
857	**ओं कावेर्यै नमः**
858	**ओं उदन्वत्यै नमः**
859	**ओं सिनीवाल्यै नमः**
860	**ओं [2]कुहवे नमः**
861	**ओं राकायै नमः**
862	**ओं वारणायै नमः**
863	**ओं [3]सिन्धुमत्यै नमः**

[1] अमलाशयायै नमः। [2] कुह्वै नमः। [3] सिन्दुमत्यसौ

864	**ओं अमायै नमः**
865	**ओं वृद्ध्यै नमः**
866	**ओं स्थित्यै नमः**
867	**ओं ध्रुवायै नमः**
868	**ओं बुद्ध्यै नमः**
869	**ओं त्रिगुणायै नमः**
870	**ओं गुणगह्वरायै नमः**
871	**ओं पूर्तये नमः**
872	**ओं मायात्मिकायै नमः**
873	**ओं स्फूर्तये नमः**
874	**ओं व्याख्यायै नमः**
875	**ओं सूत्रायै नमः**
876	**ओं प्रजावत्यै नमः**
877	**ओं विभूत्यै नमः**
878	**ओं निष्कलायै नमः**
879	**ओं [1]रम्भायै नमः**
880	**ओं रक्षायै नमः**

[1] रम्यायै नमः। धरायै नमः।

881	**ओं सुविमलायै नमः**
882	**ओं क्षमायै नमः**
883	**ओं प्राप्त्यै नमः**
884	**ओं वासन्तिकालेखायै नमः**
885	**ओं भूरिबीजायै नमः**
886	**ओं महागदायै नमः**
887	**ओं अमोघायै नमः**
888	**ओं शान्तिदायै नमः**
889	**ओं [1]स्तुत्यायै नमः**
890	**ओं ज्ञानदायै नमः**
891	**ओं उत्कर्षिण्यै नमः**
892	**ओं [2]शिखायै नमः**
893	**ओं प्रकृत्यै नमः**
894	**ओं [3]गोमत्यै नमः**
895	**ओं लीलायै नमः**
896	**ओं कमलायै नमः**
897	**ओं कामदुहे नमः**

[1] सत्यायै नमः। [2] शिवायै नमः। [3] भामिन्यै नमः।

898	**ओं विध्यै नमः**
899	**ओं प्रज्ञायै नमः**
900	**ओं रामायै नमः**
901	**ओं परायै नमः**
902	**ओं सन्ध्यायै नमः**
903	**ओं सुभद्रायै नमः**
904	**ओं सर्वमङ्गलायै नमः**
905	**ओं नन्दायै नमः**
906	**ओं भद्रायै नमः**
907	**ओं जयायै नमः**
908	**ओं रिक्तायै नमः**
909	**ओं तिथिपूर्णायै नमः**
910	**ओं [1]अमृतम्भरायै नमः**
911	**ओं काष्ठायै नमः**
912	**ओं कामेश्वर्यै नमः**
913	**ओं निष्ठायै नमः**
914	**ओं काम्यायै नमः**

[1] ऋतंभरायै नमः।

915	ओं [1]रम्यायै नमः
916	ओं वरायै नमः
917	ओं स्मृत्यै नमः
918	ओं शङ्खिन्यै नमः
919	ओं चक्रिण्यै नमः
920	ओं श्यामायै नमः
921	ओं [2]समायै नमः
922	ओं गोत्रायै नमः
923	ओं रमायै नमः
924	ओं [3]दित्यै नमः
925	ओं शान्त्यै नमः
926	ओं दान्त्यै नमः
927	ओं स्तुत्यै नमः
928	ओं सिद्ध्यै नमः
929	ओं [4]विरजायै नमः
930	ओं अत्युज्ज्वलायै नमः
931	ओं अव्ययायै नमः

[1] राम्यायै नमः। [2] सामायै नमः। [3] द्युतये नमः। शान्तिदायै नमः। [4] विराजायै नमः।

932	ओं वाण्यै नमः
933	ओं गौर्यै नमः
934	ओं इन्दिरायै नमः
935	ओं लक्ष्म्यै नमः
936	ओं मेधायै नमः
937	ओं श्रद्धायै नमः
938	ओं [1]सरस्वत्यै नमः
939	ओं स्वधायै नमः
940	ओं स्वाहायै नमः
941	ओं रतिरुषायै नमः
942	ओं [2]वसुविद्यायै नमः
943	ओं धृत्यै नमः
944	ओं सहायै नमः
945	ओं शिष्टायै नमः
946	ओं [3]इष्टायै नमः
947	ओं शुच्यै नमः
948	ओं धात्र्यै नमः

[1] अप्रमायै नमः। अदितये नमः। [2] वसवे नमः। विद्यायै नमः। धृत्यै नमः। सभायै नमः।
[3] अरिष्टायै नमः।

949	ओं [1]सुधायै नमः
950	ओं रक्षोघ्न्यै नमः
951	ओं अजायै नमः
952	ओं अमृतायै नमः
953	ओं [2]रत्नावल्यै नमः
954	ओं भारत्यै नमः
955	ओं इडायै नमः
956	ओं [3]धीरधियै नमः
957	ओं केवलायै नमः
958	ओं आत्मदायै नमः
959	ओं यस्यै नमः
960	ओं तस्यै नमः
961	ओं शुद्ध्यै नमः
962	ओं [4]सस्मितायै नमः
963	ओं कस्यै नमः
964	ओं नीलायै नमः

[1] सुधारायै नमः। [2] रमण्यै नमः। एकायै नमः। शारदांबायै नमः। समेधायै नमः। आद्यायै नमः। शुभाक्षरायै नमः। [3] धीरायै नमः। धियै नमः। [4] सोस्मितायै नमः।

965	**ओं राधायै नमः**
966	**ओं अमृतोद्भवायै नमः**
967	**ओं [1]परधुर्यास्पदायै नमः**
968	**ओं ह्रियै नमः**
969	**ओं भुवे नमः**
970	**ओं कामिन्यै नमः**
971	**ओं शोकनाशिन्यै नमः**
972	**ओं [2]मायाकृत्यै नमः**
973	**ओं रसघनायै नमः**
974	**ओं नर्मदायै नमः**
975	**ओं गोकुलाश्रयायै नमः**
976	**ओं अर्कप्रभायै नमः**
977	**ओं [3]रथेभाश्वनिलयायै नमः**
978	**ओं इन्दुप्रभायै नमः**
979	**ओं अद्भुतायै नमः**
980	**ओं श्रियै नमः**
981	**ओं कृशानुप्रभायै नमः**

[1] वरधुर्यायै नमः। स्वधायै नमः। [2] मायायै नमः। प्रीत्यै नमः। असहनायै नमः। [3] रसेभायै नमः। श्रीनिलयायै नमः।

982	**ओं वज्रलभ्भनायै नमः**
983	**ओं सर्वभूमिदायै नमः**
984	**ओं भोगप्रियायै नमः**
985	**ओं भोगवत्यै नमः**
986	**ओं भोगीन्द्रशयनासनायै नमः**
987	**ओं अश्वपूर्वायै नमः**
988	**ओं रथमध्यायै नमः**
989	**ओं [1]हस्तिनादप्रबोधिन्यै नमः**
990	**ओं सर्वलक्षणलक्षण्यायै नमः**
991	**ओं सर्वलोकप्रियङ्कर्यै नमः**
992	**ओं सर्वोत्कृष्टायै नमः**
993	**ओं सर्वमय्यै नमः**
994	**ओं भवभङ्गापहारिण्यै नमः**
995	**ओं वेदान्तस्थायै नमः**
996	**ओं ब्रह्मनीत्यै नमः**
997	**ओं ज्योतिष्मत्यै नमः**
998	**ओं अमृतावहायै नमः**

[1] हस्तिनाथप्रबोधिन्यै नमः।

999	**ओं भूताश्रयायै नमः**
1000	**ओं निराधारायै नमः**
1001	**ओं संहितायै नमः**
1002	**ओं सुगुणोत्तरायै नमः**
1003	**ओं सर्वातिशायिन्यै नमः**
1004	**ओं प्रीत्यै नमः**
1005	**ओं सर्वभूतस्थितायै नमः**
1006	**ओं द्विजायै नमः**
1007	**ओं सर्वमङ्गलमाङ्गल्यायै नमः**
1008	**ओं दृष्टादृष्टफलप्रदायै नमः**

॥ इति श्री लक्ष्मीसहस्रनामावलिः समाप्ता ॥